**Phase-IV**

**संक्षिप्तप्रतिवेदनम्, कार्यक्रमः 01**

त्रिदिवसीय–ऑनलाइन–राष्ट्रिय–कार्यशाला

# अभिकल्पन एवं विकास : टेक्स्ट एवं इमेज ई–संसाधन

**(Design & Develop: Text and Image e-Resources)**

13–15 मई 2020 पर्यन्तम्

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य बहुआयामिपरियोजना–**पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षक–शिक्षणमिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शिक्षणाधिगमकेन्द्रेण** चतुर्थचरणस्य कार्यक्रमाणां **'अभिकल्पन एवं विकास : टेक्स्ट एवं इमेज ई–संसाधन'** इति विषये प्रथम–त्रिदिवसीयराष्ट्रियकार्यशालायाः आयोजनम् 2020 तमवर्षस्य मईमासस्य त्रयोदशात् दिनाङ्कात् मईमासस्य पञ्चदशदिनाङ्कं यावत् कृतम्। कार्यशालायाः मुख्योद्देश्यं प्रतिभागिनां टेक्स्ट–इमेज ई–संसाधनानां सम्प्रत्ययानां प्रकृतेः अवगमनम्, विभिन्नोपलब्धानां एप्स, सॉफ्टवेयरस–उपकरणानां परिचयः, टेक्स्ट–इमेज ई–संसाधनानाम् अभिकल्पनम्, विकासः, प्रस्तुतिः सम्बद्धप्रक्रियासु अन्तर्दृष्टिः च आसीत्। ऑनलाइनकार्यशालायाः सञ्चालनं **गूगलमीट इत्यस्य मञ्चे** कृतम्। उद्घाटनसत्रस्य शुभारम्भः शिक्षणाधिगमकेन्द्रस्य परियोजनाध्यक्षया **प्रो. अमितापाण्डेयभारद्वाजमहोदयया** स्वागतभाषणं कार्यशालायाः सन्दर्भैः च कृतम्। तदनु श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालस्य माननीयानां कुलपतीनां **प्रो. रमेशकुमारपाण्डेयवर्याणां** द्वारा अध्यक्षीय उद्बोधनम् जातम् **प्रो. के. भरतभूषणवर्येण** (सङ्कायप्रमुखः विभागाध्यक्षश्च) धन्यवादज्ञापनेन सत्रसम्पन्नम्। कार्यशालायाः क्रियान्वयनं विशेषरूपेण अभिकल्पितेषु **द्वादश** सत्रेषु कृतम्, तेषु उद्घाटन–प्रबोधन–प्रदर्शनाधारिततकनीकीप्रश्नोत्तरसत्रम्, त्रीणि स्वाभ्यास–ऑनलाइनमाकलन–प्रतिपुष्टि– अनुभव–कथनसमापनादीनि सत्राणि जातानि। अन्तिमतिथिपर्यन्तं 423 प्रतिभागिनां पञ्जीकरणं प्राप्तम्, तेषु 235 कार्यशालायाम् आमन्त्रिताः, 193 **प्रतिभागिभिः** कार्यशाला कृता, 43 प्रतिभागिनः व्यक्तिगतकारणेन अनुपस्थिताः आसन्। 20 राज्येभ्यः 03 केन्द्रशासितप्रदेशेभ्यः प्रतिभागिनाम् आन्ध्रप्रदेशतः 04, असमतः 04, बिहारतः 07, छत्तीसगढ़तः 03, गुजराततः 02, हरियाणातः 14, झारखण्डतः 06, कर्नाटकतः 01, केरलतः 03, मध्यप्रदेशतः 12, महाराष्ट्रतः 12, ओडिशातः 10, पंजाबतः 06, राजस्थानतः 07, तमिलनाडुतः 01, तेलंगानातः 02, त्रिपुरातः 01, उत्तराखण्डतः 08, उत्तरप्रदेशतः 48, पश्चिमबंगालतः 05, दिल्लीतः 35, जम्मूकश्मीरतः 01 पुदुचेरीतः 01 प्रतिभागिनः आसन्। कार्यशालाविषये निष्णातानां देशस्य प्रतिष्ठितसंस्थानानाम् **पञ्चविशेषज्ञानां** कुशलमार्गदर्शने कृतम्। एतेषु सत्रेषु कार्यशालायाः मुख्यविषयाः आसन् ते यथा– ऑनलाइन–टेक्स्टुअलरिपॉजट्री– नेशनल–डिजिटल–लाइब्रेरी एवं शोधगंगा, प्रयोगः अनुप्रयोगश्च, टेक्स्ट ई–संसाधनानां हेतु दूरवाणी/ पीसी आधारित एप्स, संकल्पना चित्रणं शब्दचित्रनिर्माणं च। शिक्षणशास्त्रीयमुपकरणरूपेण पैडलेट, ई–संसाधनानां रूपे प्रभाविपावरपॉइन्टनिर्माणम्, चित्रसंसाधनं तेषां शैक्षिकप्रयोगः इनफोग्राफिक्सनिर्माणं सम्पादनम् च। अन्ते विशेषज्ञानां प्रस्तुतव्याख्यानानां गुणवत्ताविषये ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु यथा– **उत्कृष्टम्, अति–उत्तमम्, उत्तमम्, संतोषजनकं** च प्राप्तम् तथा च तेषां औसतम् 66%, 27%, 06% एवं 01% क्रमशः श्रेणीषु प्राप्ताः। अनेन साकं कार्यशालायाः सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्ता। यथा– **उत्कृष्टम्, अति–उत्तमम्, उत्तमम्, संतोषजनकम्**, असंतोषजनकं च। एते 10 बिन्दूनां प्राप्तश्रेण्यां औसतप्रतिशते 62% **उत्कृष्टम्**, 33% **अति–उत्तमम्**, 05% **उत्तमम्**, 00% **संतोषजनकं** च प्राप्तम्। समापनसत्रे परियोजनाध्यक्षया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तदनु अध्यक्षीयभाषणं माननीयानां **प्रो. रमेशकुमारपाण्डेयवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली) जातम्। शिक्षासङ्कायप्रमुखस्य धन्यवादज्ञापनेन कार्यशाला सम्पन्नतां गता। कार्यशालायाः समापनान्तरं सफलप्रतिभागिनां ई–चित्रावली ई–प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।